CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ

बटुकभैरवस्तोत्रं

प्रारभ्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुद्रक और प्रकाशक-

खेमराज-श्रीकृष्णदास,

मालिक-"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस, बम्बई.

पुनर्मुद्रणादि सर्वाधिकार "श्रीवेङ्कटेश्वर" मुद्रणयन्त्रालयाध्यक्षाधीन है.

पु
३५६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ अथ बटुकभैरवस्तोत्रं प्रार
भ्यते॥ॐमेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुम्॥
शंकरं परिपप्रच्छ पार्वती परमेश्वरम् ॥ १ ॥ श्री
पार्वत्युवाच ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रा
गमादिषु ॥ आपदुद्धारणं मन्त्रं सर्वसिद्धिप्रदं नृ
णाम् ॥२॥ सर्वेषां चैव भूतानां हितार्थं वाञ्छि
तं मया ॥ विशेषतस्तु राज्ञां वै शान्तिपुष्टिप्रसा
धनम् ॥ ३ ॥ अंगन्यासकरन्यासदेहन्याससम
न्वितम् ॥ वक्तुमर्हसि देवेश मम हर्षविवर्धन॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क
२५६

॥ ४ ॥ ईश्वर उवाच ॥ शृणु देवि महामन्त्र
मापदुद्धारहेतुकम् ॥ सर्वदुःखप्रशमनं सर्वशत्रु
विनाशनम् ॥ ५ ॥ अपस्मारादिरोगाणां ज्वरा
दीनां विशेषतः ॥ नाशनं स्मृतिमात्रेण मन्त्रस्य
जमिमं प्रिये ॥ ६ ॥ ग्रहरोगभयानां च नाशनं
सुखवर्धनम् ॥ स्नेहाद्वक्ष्यामि ते मन्त्रं सर्वसार
मिमं प्रिये ॥ ७ ॥ सर्वकामार्थदं पुण्यं राज्यभो
गप्रदं नृणाम् ॥ आपदुद्धारणमिति मन्त्रं वक्ष्या
म्यशेषतः ॥८॥ प्रणवं पूर्वमुद्धृत्य देवीप्रणवमु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्धरेत् ॥ बटुकायेति वै पश्चादापदुद्धारणाय च ॥
॥९॥ कुरुद्वयं ततः पश्चाद्बटुकाय पुनः क्षिपेत्
देवीप्रणवमुद्धृत्य मन्त्रोद्धारमिमं प्रिये ॥
॥ १० ॥ मन्त्रोद्धारमिमं देवि त्रैलोक्ये चातिदु
र्लभम् ॥ अप्रकाश्यमिमं मन्त्रं सर्वशक्तिसमन्वि
तम् ॥ ११ ॥ स्मरणादेव मन्त्रस्य भूतप्रेतपि
शाचकाः ॥ विद्रवन्त्यतिभीता वै कालरुद्रादिव
प्रजाः ॥ १२ ॥ पठेद्वा पाठयेद्वापि पूजयेद्वापि
पुस्तकम् ॥ नाग्निचौरभयं तस्य ग्रहराजभयं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथा ॥ १३ ॥ न च मारीभयं किंचित्सर्वत्र सुख
वान्भवेत् ॥ आयुरारोग्यमैश्वर्य्यं पुत्रपौत्रादिस
म्पदः ॥ १४ ॥ भवन्ति सततं तस्य पुस्तकस्या
पि पूजनात् ॥ न दारिद्र्यं न दौर्भाग्यं नापदां
भयमेव च ॥ १५ ॥ पार्वत्युवाच ॥ क एष
भैरवो नाम आपद्धारणो मतः ॥ त्वया च क
थितो देव भैरवः कल्पवित्तमः ॥१६॥ तस्य ना
मसहस्राणि अयुतान्यर्बुदानि च ॥ सारमुद्धृत्य
तेषां वै नामाष्टशतकं वद ॥ १७ ॥ यानि संकी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्त्तयन्मर्त्यः सर्वदुःखविवर्जितः ॥ सर्वान्कामान
वाप्नोति साधकः सिद्धिमेव च ॥१८॥ ईश्वर उवा
च ॥ शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः॥
आपदुद्धारणस्येदं नामाष्टशतमुत्तमम् ॥ १९ ॥
सर्वपापहरं पुण्यं सर्वापत्तिविनाशनम् ॥ सर्वका
मार्थदं देवि साधकानां सुखावहम् ॥ २० ॥ सर्व
मंगलमांगल्यं सर्वोपद्रवनाशनम् ॥ आयुष्करं
पुष्टिकरं श्रीकरं च यशस्करम् ॥ २१ ॥ नामाष्ट
शतकस्यास्य च्छन्दोऽनुष्टुप्प्रकीर्त्तितम्॥ बृहदा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रण्यको नाम ऋषिर्देवोऽथ भैरवः ॥२२॥ अष्ट
बाहुं त्रिनयनमिति बीजं समाहितम् ॥ शक्तिकं
कीलकं शेषमिष्टसिद्धौ नियोजयेत् ॥२३॥ सर्व
कामार्थसिद्ध्यर्थं विनियोगः प्रकीर्तितः॥देहान्तं
न्यासकं चैव पूर्वं कुर्याच्च साधकः॥२४॥ह्रींबीजं
बटुकःशक्तिः प्रणवः कीलकं मतम् ॥ आरोग्या
युरभीष्टश्रीसिद्ध्यर्थं विनियुज्यते ॥ २५ ॥ भैरवं
मूर्ध्नि विन्यस्य ललाटे भीमदर्शनम्॥नेत्रयोर्भूत
हननं सारमेयानुगंभ्रुवोः ॥२६॥ कर्णयोर्भूतनाथं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च प्रेतवाहं कपोलयोः ॥ नासापुटौष्ठयोश्चैव भ
स्मांगं सर्पभूषणम् ॥ २७ ॥ अनादिनाथं सौम्ये
च शक्तिहस्तं गले न्यसेत् ॥ स्कन्धयोर्दैत्यशमनं
बाह्वोरतुलतेजसम् ॥२८॥ पाण्योःकपालिनं न्य
स्य हृदये मुण्डमालिनम्॥शान्तं वक्षःस्थले न्य
स्य स्तनयोः कामचारिणम् ॥ २९ ॥ उदरे च
सदातुष्टं क्षेत्रेशं पार्श्वयोस्तथा ॥ क्षेत्रपालं पृ
ष्ठदेशे क्षेत्रज्ञं नाभिदेशके ॥ ३० ॥ पापौघना
शनं कट्यां बटुकं लिङ्गदेशके ॥ गुदे रक्षाकरं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यस्य तथोर्वो रक्तलोचनम् ॥ ३१ ॥ जानुनो
र्घुर्घुरारावं जंघयो रक्तपाणिनम् ॥ गुल्फयोः पा
दुकासिद्धं पादपृष्ठे सुरेश्वरम् ॥ ३२ ॥ आपाद
मस्तकं चैव आपदुद्धारकं तथा ॥ पूर्वे डमरुह
स्तं च दक्षिणे दण्डधारिणम् ॥ ३३ ॥ खड्गहस्तं
पश्चिमे च घण्टावादिनमुत्तरे ॥ आग्नेय्यामग्नि
वर्णं च नैर्ऋत्यां च दिगम्बरम् ॥३४॥ वायव्यां
सर्वभूतस्थमैशान्यां चाष्टसिद्धिदम् ॥ ऊर्ध्वं खे
चारिणं न्यस्य पाताले रौद्ररूपिणम् ॥ ३५ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवं न्यस्य च देहे स्वेषडङ्गेषु ततो न्यसेत्॥रुद्रमं
गुष्ठयोर्न्यस्य तर्जन्योस्तु शिखीसखम् ॥ ३६ ॥
शिवं मध्यमयोर्न्यस्यानामिकायां त्रिशूलिन
म्॥ब्रह्माणं तु कनिष्ठायां तलयोस्त्रिपुरांतकम् ॥
॥३७॥मांसाशिनं कराग्रे तु करपृष्ठेदिगम्बरम् ॥
हृदये भूतनाथाय आदिनाथाय मूर्द्धनि ॥३८॥
आनन्दपदपूर्वाय नाथायाथ शिखासु च॥ सिद्ध
स्थावरनाथाय कवचे विन्यसेत्तथा ॥३९॥ सह
जानन्दनाथाय न्यसेन्नेत्रत्रयेषु च॥ परमानन्द

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाथाय अस्त्रे चैव प्रयोजयेत्॥४०॥एवं न्यासवि
धिं कृत्वा यथावत्तदनन्तरम् ॥ ध्यायेच्चैव महे
शानि साधकः सर्वसिद्धये ॥४१॥ ध्यानं तस्य
प्रवक्ष्यामि यथा ध्यात्वा पठेन्नरः ॥ शुद्धस्फटि
कसंकाशं सहस्रादित्यवर्चसम् ॥ ४२ ॥ नील
जीमूतसंकाशं नीलाञ्जनसमप्रभम् ॥ अष्टबाहुं
त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥ ४३ ॥ दंष्ट्रा क
रालवदनं नूपुरारावसंकुलम् ॥ भुजंगमेखलं दे
वमग्निवर्णशिरोरुहम् ॥ ४४ ॥ दिगम्बरं कुमारं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शं बटुकाख्यं महाबलम्॥खट्वांगमसिपाशौ च शूलं दक्षिणभागतः ॥ ४५ ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ अग्निवर्णसमोपेतं सारमेयसमन्वितम् ॥४६॥ ध्यात्वा जपेत्सुसंतुष्टः सर्वान्कामानवाप्नुयात्॥४७॥वन्दे बालं स्फटिकसदृशंकुंतलोद्भासिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराढ्यैः ॥ दीप्ताकारं विशदवदनं सुप्रसन्नं महेशं हस्ताब्जाभ्यां बटुकमनिशं शूलखड्गौ दधानम् ॥ ४८ ॥ उद्यद्भास्करसन्निभं त्रि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नयनं रक्ताङ्गरागस्रजं स्मेरास्यं वरदं कपालम
भयं शूलं दधानं करैः ॥ नीलग्रीवमुदारभूषण
युतं शीतांशुखंडोज्ज्वलं बंधूकारुणवाससं भ
यहरं देवं सदा भावयेत् ॥४९॥ ध्यायेत्त्रैलोक्य
कान्तं शशिशकलधरं मुण्डमालं महेशं दिग्वस्त्रं
पिंगकेशं डमरुमथ सृणिखड्गशूले दधानम्॥नागं
घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं स
र्पाकल्पं त्रिनेत्रं मणिमयविलसत्किंकिणीनूपुरा
ढ्यम् ॥५०॥करकलितकपालःकुण्डली दण्डपा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णिस्तरुणतिमिरनीलव्यालयज्ञोपवीती ॥ ऋतु
समयसपर्य्याविघ्नविच्छेदहेतुर्जयति बटुकना
थः सिद्धिदः साधकानाम् ॥ ५१ ॥ ध्यात्वा
जपेत्सुसंहृष्टः सर्वान्कामानवाप्नुयात् ॥ आयु
रारोग्यमैश्वर्यसिद्ध्यर्थं विनियोजयेत् ॥ ५२ ॥
अस्य श्रीबटुकभैरवनामाष्टशतकापदुद्धारण
स्तोत्रमन्त्रस्य बृहदारण्यक ऋषिः । श्रीबटुक
भैरवोदेवता । अनुष्टुप् छन्दः । ह्रीं बीजम् ।
बटुकायेति शक्तिः । प्रणवः कीलकम् ॥ अभी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

फ
उ५६

ष्टसिद्ध्यर्थं पाठे जपे विनियोगः ॥ ह्रां वाम्
अंगुष्ठाभ्यां नमः । ह्रीं वीं तर्जनीभ्यां स्वाहा
ह्रूं वूं मध्यमाभ्यां वषट् । ह्रैं वैं अनामिकाभ्यां हुम्
ह्रौं वौं कनिष्ठिकाभ्यां वौषट् । ह्रः वः करतलकरपृ
ष्ठाभ्यां फट् । इति करन्यासः । अथ षडङ्गन्यासः ।
ह्रां वां हृदयाय नमः । ह्रीं वीं शिरसे स्वाहा ।
ह्रूं वूं शिखायैवषट् ॥ ह्रैं वैंकवचाय हुम् । ह्रौंवौं नेत्रत्र
याय वौषट् ॥ ह्रः वः अस्त्राय फट् ॥ इति षडङ्गन्या
सः ॥ अतितीक्ष्ण महाकाय कल्पान्तदहनोपम ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ १ ॥
शांतं पद्मासनस्थं शशिमुकुटधरं चोन्नताङ्गं त्रि
नेत्रं शूलं खड्गं च वज्रं परशुमुसलके दक्षिणाङ्गे
वहन्तम् ॥ नागं पाशं च घण्टां नलिनकरयुतं
सांकुशं वामभागे नागालङ्कारयुक्तं स्फटिकम
णिनिभं नौमितत्त्वं शिवाख्यम्॥२॥नमस्कारम
न्त्रः॥ह्रीं ह्रौं नमः शिवाय॥ॐभैरवो भूतनाथश्च
भूतात्मा भूतभावनः॥क्षेत्रज्ञः क्षत्रपालश्च क्षेत्रदः
क्षेत्रियो विराट् ॥ १ ॥ श्मशानवासी मांसाशी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

खर्पराशी स्मरांतकृत् ॥ रक्तपः पानपः सिद्धः सिद्धिदःसिद्धिसेवितः ॥२॥कङ्कालःकालशमनः कलंकाष्ठातनुः कविः ॥ त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः ॥३ ॥ शूलपाणिः खड्गपाणिः कङ्काली धूम्रलोचनः॥ अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः ॥४॥ धनदो धनहारी च धनवान् प्रतिभानवान्॥नागहारो नागकेशो व्योमकेशः कपालभृत् ॥५॥ कालः कपालमाली च कमनीयः कलानिधिः॥त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च त्रिलोकपः ॥ ६ ॥ त्रिनेत्रतनयो डिम्भः शा
न्तः शान्तजनप्रियः ॥ बटुको बहुवेषश्च खट्वाङ्ग
वरधारकः ॥ ७ ॥ भूताध्यक्षः पशुपतिर्भिक्षुकः
परिचारकः ॥ धूर्तो दिगम्बरः शौरिर्हरिणः पा
ण्डुलोचनः ॥ ८ ॥ प्रशान्तः शांतिदः सिद्धः
शङ्करप्रियबांधवः ॥ अष्टमूर्तिर्निधीशश्च ज्ञान
चक्षुस्तपोमयः ॥ ९ ॥ अष्टाधारः षडाधारः स
र्पयुक्तः शिखीसखा ॥ भूधरो भूधराधीशो भू
पतिर्भूधरात्मजः ॥१०॥ कङ्कालधारी मुण्डी च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नागयज्ञोपवीतकः ॥ जृम्भणो मोहनः स्तम्भी
मारणः क्षोभणस्तथा ॥ ११ ॥ शुद्धो नीलाञ्जन
प्रख्यो दैत्यहा मुण्डभूषितः॥बलिभुग्बलिभुङ्ना
थो बालोबालपराक्रमः ॥ १२ ॥ सर्वापत्तारणो
दुर्गो दुष्टभूतनिषेवितः ॥ कामी कलानिधि
कांतः कामिनीवशकृद्वशी ॥ १३ ॥ सर्वसिद्धि
प्रदो वैद्यः प्रभुर्विष्णुरतीव हि॥ अष्टोत्तरशतंना
म्नां भैरवस्य महात्मनः ॥१४॥ मया ते कथितं
देवि रहस्यं सार्वकामिकम् ॥ य इदं पठते स्तोत्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नामाष्टशतमुत्तमम् ॥ १५ ॥ न तस्य दुरितं किं
चिन्नच भूतभयं तथा ॥ नच मारीभयं तस्य
ग्रहराज्यभयं तथा ॥१६॥ न शत्रुभ्यो भयं कि
ञ्चित्प्राप्नुयान्मानवः क्वचित् ॥ पातकानां भयं
नैव यः पठेत्स्तोत्रमुत्तमम् ॥ १७ ॥ मारीभये
राजभये तथा चौराग्निजे भये ॥ औत्पातिकभ
ये चैव तथा दुःस्वप्नजे भये ॥ १८ ॥ बंधने च
तथा घोरे पठेत्स्तोत्रमनुत्तमम् ॥ सर्वं प्रशममा
याति भयं भैरवकीर्त्तनात् ॥ १९ ॥ एकादश

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सहस्रं तु पुरश्चरणमुच्यते ॥ यस्त्रिसन्ध्यं पठे
द्देवि संवत्सरमतंद्रितः ॥ २० ॥ स सिद्धिमा
प्नुयादिष्टां दुर्लभामपि मानवैः ॥ षण्मासाद्भू
मिकामस्तु जपित्वा प्राप्नुयान्महीम् ॥ २१ ॥
राजशत्रुविनाशाय जपेन्मासाष्टकं यदि ॥ रात्रौ
वारत्रयं भृत्यो राजानं वशमानयेत् ॥ २२ ॥
धनार्थं च सुतार्थं च दारार्थं यस्तु मानवः ॥ प
ठेन्मासत्रयं देवि वारमेकं तथा निशि॥२३॥धनं
पुत्रांस्तथा दारान्प्राप्नुयान्नात्र संशयः ॥ रोगी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रोगात्प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥ २४ ॥
भीतो भयात्प्रमुच्येत देवि सद्यो न संशयः ॥
निगडैश्चापि यो बद्धः कारागृहनिपातितः॥२५॥
शृंखलाबन्धनं प्राप्तः पठेच्चेदं दिवानिशि ॥ यान्
यान्समीहते कामांस्तांस्तान्प्राप्नोति निश्चितम्
॥ २६ ॥ अप्रकाश्यमिदं गुह्यं न देयं यस्य क
स्यचित् ॥ सुकुलीनाय शान्ताय ऋजवे दम्भ
वर्जिने ॥ २७ ॥ दद्यात्स्तोत्रमिदं पुण्यं सर्वकाम
फलप्रदम् ॥ इति श्रुत्वा ततो देवी नामाष्टशतमु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्तमम् ॥ २८ ॥ सन्तोषं परमं प्राप्य भैरवस्य प्रसादतः ॥ भैरवस्य प्रसन्नाभूत्सर्वलोकमहेश्वरी ॥ २९ ॥ भैरवस्तु प्रहृष्टोऽभूत्सर्वज्ञः परमेश्वरः ॥ जजाप परया भक्त्या सदा सर्वेश्वरेश्वरी ॥ ॥ ३० ॥ इति श्रीरुद्रयामले तन्त्र आपदुद्धारणं नाम भैरवस्तोत्रं समाप्तम् ॥ अथ मन्त्रः ॥ ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरुकुरु बटुकाय ह्रीं ॐ नमः शिवाय ॥ ॥ शुभम्भूयात् ॥

संवत् १९९४, शके १८५९.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रय्यपुस्तकानि (मंत्रशास्त्रग्रंथाः ।)

नाम	की. रु. आ.
मंत्रमहोदधि--सटीक यंत्रोंसहित	४–८
शाक्तप्रमोद--दशमहाविद्याका पंचांग और पांच देवताका पंचांग राजा देवनंदन संगृहीत इसमें १८४ विषयोंका एकत्र संग्रह है	६–०
दुर्गोपासनाकल्पद्रुम--हरिकृष्णसंगृहीत जिसमें दुर्गाजीके ६० प्रकरण हैं	५–०
श्रीतत्त्वनिधि--मैसूरराज्याधीश कृष्णराजसंगृहीत. समस्त सनातन धर्मावलंबियोंके संग्रहोपयोगी है	४–०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महानिर्वाण—पं० बलदेव प्रसाद मिश्रकृत भाषा टीकासमेत । इसमें तांत्रिक उपासना मूलमंत्र कर्मकांडादि आध्यात्मिकतत्त्वादि विषय हैं... ४—०

अनुष्ठानप्रकाश (चतुर्थीलालकृत) नैमित्तिककर्म-में उपयोगी. इसमें अकडमचक्र दीक्षा पुरश्च-रण सूर्यचंद्रादि ग्रहणोंमें पुरश्चरण संकल्पादि संगृहीत है और अनेक प्रकारके देवी देव-ताके अनुष्ठान प्रकाश किये हैं ... ... ६—०

माहेश्वरीतंत्र—भाषाटीका । इसमें मारण मोहन वशीकरण उच्चाटनादि विधि वर्णित हैं ... ०—३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाम.	की. रु. आ.
हनुमदुपासना—(सांगोपांग हनुमदाराधन) जिसमें पंचमुखी एकादशमुखी हनुमत्कवच हनुमत्सहस्रनाम आदि (३४) विषय हैं	
अत्युत्तम रेशमी गुटका ...	... २—०
" " तथा खुलापत्रा ...	... १—१२
महायक्षिणीसाधन—पं० ज्वालाप्रसादमिश्रकृत भाषाटीकासमेत, इसमें अनेक प्रकारकी यक्षिणी साधनादि विधि समस्त (२२५) विषय हैं	... ०—१२
योगिनीतंत्र—पं. कन्हैयालालमिश्रकृत भा. टी. सहित	

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाहि-
१४

नाम.	की. रु. आ.
इसमें भगवतीकी उपासना मंत्र पुरश्चरण अनुष्ठानविधि इत्यादि वर्णन है... ...	४—०
मंत्रमहार्णव—मंत्रशास्त्रका महान् ग्रंथ संपूर्ण छपके तैयार है	१८—०
दत्तात्रेयतंत्र—भाषाटीकासमेत । इसमें मारणादिषट्कर्म रसायन प्रयोग औषधप्रयोग इत्यादि (२४) पटलमें वर्णित हैं ...	०—६
क्रियोड्डीशतंत्र—भाषाटीकासमेत—इन्द्रजिद्विरचित तात्कालिकसिद्धिप्रद प्रत्येकप्रकारके मत्रादि वर्णित हैं	०—१०

रात.

१४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाम.	की. रु. आ.
आश्चर्ययोगमालातंत्र–पं. बलदेवप्रसाद मिश्रकृत भाषाटीका। अनेक प्रकारके योगानुकूल षट्कर्म और गर्भ इत्यादिकका औषधि प्रयोग	०–४
गुप्तसाधनतंत्र-पं.बलदेवप्रसाद मिश्रकृत भा.टी.सहित	०–६
पुरश्चरणदीपिका–पुरश्चरणकर्ममें अतिउपयोगी	०–३
वंध्यातंत्र-भाषाटीकासमेत। वंध्यास्त्रीको संतति होनेका उपाय	०–४
सिद्धशंकरतंत्र–भाषाटीका (अपूर्वसिद्धि) ...	०–६
कार्तवीर्यार्जुनोपासनाध्याय–यह ग्रंथ सभी लोगोंको अवश्य लेना चाहिये ...	२–०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाम.	की. रु. आ.
अघोरी तन्त्र—सरलभाषामें तन्त्रकी उपयोगी मन्त्र तन्त्र साधनविधि उत्तम है ...	०—८
अष्टसिद्धि—पं. कन्हैयालाल मिश्रकृत भाषा-टीकासहित—नामसे ही विषय प्रसिद्ध है ...	०—१२
गायत्रीतन्त्र-पं. बलदेवप्रसाद मिश्रकृत भाषाभाष्य-समेत-इसमें गायत्रीका कवच,हृदय,रहस्यादि हैं	०—८
मन्त्रविद्या—श्रीमहादेवप्रणीत । इसमें मोहनादि षट्कर्म तथा अनेक अपूर्व बिषय हैं ...	१—०
उड्डीशतंत्र—रावणविरचित । मूल तथा पं. श्याम-सुन्दरलाल त्रिपाठीकृत भाषाटीकासहित । ...	०—६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाम	की. रु. आ.
यंत्रचिन्तामणि—पं. बलदेवप्रसाद मिश्रकृत भाषाटीकासहित। इसमें वशीकरण, आकर्षण, स्तम्भनादि षट्प्रयोग शान्ति पौष्टिकादि तथा गर्भ बालरक्षाकारक यंत्रोका विशेष रूपसे वर्णन है।	०—१२

पुस्तक मिलनेका ठिकाना—

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस,
बंबई.

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम्-प्रेस,
कल्याण—बंबई.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति

बटुकभैरवस्तोत्रं

समाप्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri